दिनाङ्कः-08.04.2025 सायम् - 06:20

**मुख्यवार्ताः**

- प्रधानमन्त्री नरेन्द्रमोदी मुद्रायोजनायाः दशाब्दपूर्तौ उक्तवान् यत् योजनैषा उद्यमिनां सशक्तकरा एका जागृता क्रांतिः अस्तीति।
- प्रधानमन्त्रिणा दुबई- देशस्य युवराजेन प्रिंस-शेख-हमदान इत्यनेन सह मेलनं कृतम्; भारत-यूएई इत्येतयोः सम्बन्धान् सुदृढीकरणे दुबई इति क्षेत्रस्य महत्वपूर्णा भूमिका अस्तीति च तेन प्रख्यापितम्।
- जम्मू-कश्मीरे त्रिभिः अन्यैः राजनीतिकसङ्घठनैरपि पृथक्तावादिना हुर्रियत कॉन्फ्रेंस इत्यनेन आत्मानं पृथकीकृतम्, गृहमन्त्री अमितशाहः अस्य पदक्षेपस्य स्वागतम् अकरोत्।
- सर्वकारेण "एकं राज्यम्, एकम् आरआरबी" इति नीत्यनुसारं षड्विंशतिः क्षेत्रीय ग्रामीण-वित्तकोषाणां विलयस्य घोषणा कृता।
- चीनदेशेन अमेरिकादेशस्य राष्ट्रपतिनः ट्रम्पस्य पञ्चाशत्प्रतिशतात्मकस्य अतिरिक्त टैरिफ इत्यस्य घोषणां बलाद्ध्र्योत्पादनस्य नीतिः अस्ति इति उक्तम्।
- आईपीएल टी-20 इति क्रिकेटस्पर्धायां लखनऊ-सुपर-जायंट्स इति दलेन आतिथ्यधायिनः कोलकाता नाइट राइडर्स इति दलस्य पुरतः अष्टत्रिंशदधिकद्विशत-धावनाङ्कानाम् लक्ष्यं समुपस्थापितमस्ति।

**प्रधानमन्त्री-मुद्रा-योजना**

प्रधानमन्त्री-मुद्रा-योजना इत्यस्याः दशवर्षपूर्त्यवसरे श्रीमोदी उक्तवान् यत् अनया योजनया अनेकेषां जनानां स्वप्नानि पूर्णानि जातानि । प्रधानमन्त्री प्रोक्तवान् यत् देशे मुद्रा योजनायाः लाभार्थिनः पञ्चाशत् प्रतिशतं अनुसूचित-जातीयाः, जनजातयः, अन्ये च पश्चवर्तीवर्गसमुदायाः च सन्ति । सः अवदत् यत् अस्याः योजनायाः सप्ततिः प्रतिशतं लाभार्थिनः महिलाः सन्ति । प्रधानमन्त्री स्वनिवासस्थाने योजनायाः लाभार्थिभिः सह परिचर्चां कृतवान् । सः अवदत् यत् मुद्रा-योजना इत्यनया असंख्यजनेभ्यः स्वस्याः उद्यमशीलतायाः कौशलं प्रदर्शयितुं अवसराः प्रदत्ताः। लाभार्थिभिः सह वार्तालापसमये प्रधानमन्त्रिणा उक्तं यत् देशस्य यूनां कृते साहसं दातुं एषा मुद्रायोजना आरब्धा इति। सः अवदत् यत् यूनां वृत्यर्थं तान् आत्मविश्वासेन च पूरयितुं अस्याः योजनायाः उद्देश्यं वर्तते। अस्मिन् अवसरे लाभार्थिनः प्रधानमन्त्रिणे स्वस्याः उद्यमशीलतायाः अनुभवान् अवदन्। प्रधानमन्त्री-मुद्रा-योजना सूक्ष्म-लघु-उद्यमवर्गीय- जनेभ्यः विंशतिः लक्ष-रूप्यकाणि यावत् ऋणं प्रददाति। विगतदशवर्षेषु अस्याः योजनायाः अन्तर्गतं द्विपञ्चाशत्कोट्यकेभ्यः अधिकजनेभ्यः ऋणं स्वीकृतमिति।

**सुब्रह्मण्यम् जयशंकरः/दुबई**

विदेशमन्त्रिणा डॉ० सुब्रह्मण्यम्-जयशंकरेण दुबई-भारतयोर्मध्ये सम्बन्धान् वर्धनमुद्दिश्य दुबईनरेशस्य सुतेन शेखहमदान-बिन-मोहम्मद-अल-मकतूम इत्यनेन सह मेलनम् कृतम्। दुबई इति क्षेत्रस्य युवराजेन यो हि तत्रत्यः उपप्रधानमन्त्री रक्षामन्त्री चाप्यस्ति, सम्प्रति द्विदिवसीयायां भारतयात्रायां नवदिल्लीं सम्प्राप्तोऽस्ति। युवराजत्वेन एषा तस्य प्रथमा आधिकारिकी भारतयात्रा अस्ति। प्रधानमन्त्रिणा नरेन्द्रमोदिना तस्य

मध्याह्नभोजनस्य आयोजनं विहितम्। प्रधानमन्त्रिणा दुबई- देशस्य युवराजेन प्रिंस शेख हमदान इत्यनेन सह मेलनं कृतम्; भारत-यूएई इत्येतयोः सम्बन्धान् सुदृढीकरणे दुबई इति क्षेत्रस्य महत्वपूर्णा भूमिका अस्तीति च तेन प्रख्यापितम्। युवराज: अद्य संध्यायां-मुम्बई-नगरं प्रति प्रस्थास्यति, यत्र स: उभयोर्देशयो: शीर्षोद्यमिभिस्समं चक्रमञ्चीय-उपवेशने प्रातिभाग्यं विधास्यति।

## राष्ट्रपुति द्रौपदी मुर्मु:

राष्ट्रपतिः द्रौपदी मुर्मुः निज पुर्तगाल देशस्य यात्रायाः द्वितीये, अन्तिमे च दिवसे प्रधानमंत्रिणा लुईस मोरे नेग्रो वर्येण सह मेलनं विहितवती, ध्यातव्यमस्ति यत् राष्ट्रपतिः द्रौपदी मुर्मु ह्य: लिस्बन नगरे राष्ट्रपतिना मार्सेलो रेबेला वर्येण सह प्रतिनिधि मंडलस्तरीय परिचर्चा विहितवती। पुर्तगालस्य असेंबलिया दा रिपब्लिका इति संसद: अध्यक्ष: राष्ट्रपतेः द्रौपदी मुर्मुवर्याया: स्वागतं अकरोत्, सममेव सा गार्ड ऑफ ऑनर इति सम्मानम् अपि लब्धवती। सा असेंबलिया दा रिपब्लिका इति संसद: सभापतिना जोस पेड्रो एगुइर ब्रैंको इत्यनेन सह परिचर्चां अपि विहितवती। विदेश मंत्रालयस्य आधिकारिक प्रवक्तानुसारं उभयो: पक्षयो: सम्बन्धान् सुदृढीकरणेति विषये परिचर्चा सञ्जाता।

## अमितशाह:

केन्द्रीय-गृहमंत्री अमित शाह: अद्य श्रीनगरस्य राजभवने उच्चस्तरीयोपवेशनस्य आध्यक्षं अकरोत्। अस्मिन्नोपवेशने जम्मू-कश्मीरे चलायमानानां विकास-परियोजनानां प्रगतीनां समीक्षां व्यदधात्। अस्मिन् उपवेशने उपराज्यपाल: मनोज-सिन्हा, मुख्यमन्त्री उमर-अब्दुल्ला अन्ये च गणमान्यजना: समुपस्थिता: आसन्। ध्यातव्यमस्ति यत् जम्मू-कश्मीरे त्रिभिः अन्यैः राजनीतिकसङ्घठनैरपि पृथक्तावादिना हुर्रियत कॉन्फ्रेंस इत्यनेन आत्मानं पृथकीकृतम्, गृहमन्त्री अमितशाहः अस्य पदक्षेपस्य स्वागतम् अकरोत्।

## शिवराजसिंह:

कृषि-कृषक-कल्याण च मन्त्री शिवराज सिंह चौहान:, इजराइल देशस्य कृषिमन्त्री अवीदिखतेर: इत्येताभ्याम् अद्य नवदिल्ल्यां कृषिक्षेत्रेषु द्विपक्षीय-सहयोगाधारितेषु सन्धिपत्रेषु हस्ताक्षरे विहिते। श्रीचौहानेन सम्मेलनमिमं सम्बोधयता प्रोक्तं यत् इजराइलभारतयोर्मध्ये द्विपक्षीय: सहयोग: अग्रे वर्धमान: अस्तीति। तेनोक्तं यत् उभावपि देशौ कृषि-नवाचार-जल-प्रौद्योगिकी आदिषु क्षेत्रेषु औत्कृष्ट्यं सहयोगं विदधत:। तेनोक्तं यत् प्रधानमन्त्रिण: नरेन्द्रमोदिन: नेतृत्वे प्रशासनं लघुकृषकेभ्य: कृषिम् इतोप्यधिकतया लाभकरं कर्तुं प्रयासरतमस्ति।

## हरदीप पुरी / टैरीफ

पैट्रोलियम अथ प्राकृतिक गैस इत्यस्य मंत्री हरदीपसिंहपुरी इत्येषः अमेरिकादेशेन योजितानां टैरिफ इत्येतेषां प्रत्युत्तरे उक्तवान् यत् विषयेऽस्मिन् सवहितमनसा विश्लेषणस्य आवश्यकता अस्ति। अद्य नवदिल्ल्यां

वार्ताहरैस्सह भाषमाणेन मन्त्रिणा प्रोक्तं यत् सहसा विदधीत न क्रियाम्, पूर्वं टैरिफ इति विषये का प्रगतिः भविष्यतीति विचारणीयमस्ति।

## एकं राज्यम्, एकम् आरआरबी

सर्वकारेण "एकं राज्यम्, एकम् आरआरबी" इति नीत्यनुसारं षड्विंशतिः क्षेत्रीय ग्रामीण-वित्तकोषाणां विलयस्य घोषणा कृता।

## चीनस्य प्रतिक्रिया टैरिफेति प्रकरणे

चीनदेशेन अमेरिकादेशस्य राष्ट्रपतिना डोनाल्डट्रम्प इत्यनेन चीनदेशीयवस्तुषु योजितस्य पञ्चाशत्प्रतिशतात्मकस्य टैरिफ इत्यस्य विषये तीव्रा कठोरा च प्रतिक्रिया प्रदत्तास्ति।

## आई०पीएल्०-क्रीडायां

आईपीएल विंशतिं, प्रति विंशति: इति क्रिकेटस्पर्धायां लखनऊ सुपर जायंट्स इति दलेन आतिथ्यधायिनः कोलकाता नाइट राइडर्स इति दलस्य पुरतः अष्टत्रिंशदधिकद्विशत-धावनाङ्कानाम् लक्ष्यं समुपस्थापितमस्ति।

**।। इति वार्ता: ।।**